## यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । (९/६४५)

कर्मप्रवचनीययुक्त इति वर्तते । यस्मादधिकं [1]यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्ति-र्भवति । उप (१. ४. ८७/५५१) खार्यां द्रोणः । उप निष्के [2]कार्षापणम् । यस्य चेश्वरवचनम् इति स्वस्वामिनो-र्द्वयोरपि पर्यायेण सप्तमी विभक्तिर्भवति । अधि (१. ४. ९७/६४४) ब्रह्मदत्ते पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्तः (म. भा. १. ४४७) [3]इति । [4]द्वितीयापवादो योगः ।।

## पञ्चम्यपाङ्परिभिः । (१०/५९८)

[5]अप आङ् परि इत्येतैः कर्मप्रवचनीयै[6]र्योगे पञ्चमी विभक्तिर्भवति[7] । अप (१. ४. ८८/६९६) त्रिगर्तेभ्यो वृष्टो देवः । [8]आ (१. ४. ८९/५९७) पाटलिपुत्राद् वृष्टो देवः । परि (१. ४. ८८/६९६) त्रिगर्तेभ्यो वृष्टो देवः । अपेन साहचर्यात् परेर्वर्जनार्थस्य[9] ग्रहणम्, तेनेह[10] न भवति, वृक्षं परि (१. ४. ९०/५५२) विद्योतते विद्युत् ।।

## प्रतिनिधिप्रतिदाने च यस्मात् । (११/६००)

मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । यस्मात् प्रनिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिर्भवति । अभिमन्युरर्जुनतः प्रति (१. ४. ९२/५९९) । [11]प्रद्युम्नो वासुदेवतः प्रति । माषानस्मै तिलेभ्यः [12]प्रति (१. ४. ९२/५९९) यच्छति । ननु च प्रतिनिधिप्रतिदाने [13]कर्मप्रवचनीययुक्ते, न तु यतः प्रतिनिधिप्रतिदाने ? [14]नैष दोषः, [15]सम्बन्धसम्बन्धात् तस्यापि योगोऽस्त्येव ।।

## गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । (१२/५८५)

गत्यर्थानां धातूनां चेष्टाक्रियाणां [16]परिस्पन्दक्रियाणां कर्मणि कारके[17]ऽध्ववर्जिते द्वितीयाचतुर्थ्यौ[18] भवतः । ग्रामं गच्छति, ग्रामाय गच्छति । ग्रामं व्रजति, ग्रामाय व्रजति । गत्यर्थग्रहणं किम् ? ओदनं पचति । कर्मणि इति किम् ? अश्वेन व्रजति । चेष्टायाम् इति किम् ? मनसा पाटलिपुत्रं [19]गच्छति । अनध्वनि इति किम् ? अध्वानं गच्छति । [20]अध्वनीत्यर्थग्रहणम् (म. भा. १. ४४८) । पन्थानं [21]गच्छति । मार्गं [22]गच्छति । आस्थित-प्रतिषेध[23]श्चायं विज्ञेयः (म. भा. १. ४४८) । [24]आस्थितः सम्प्राप्तः, [25]आक्रान्त उच्यते । यत्र तु उत्पथेन पन्थानं गच्छति, [26]तत्र भवितव्यमेव चतुर्थ्या, [27]पथे गच्छति [28]इति (म. भा. १. ४४८) । द्वितीयाग्रहणं किम् ? न चतुर्थ्येव विकल्प्येत, अपवादविषयेऽपि यथा स्यात् । ग्रामं गन्ता । ग्रामाय गन्ता । कृद्योगलक्षणा षष्ठी न भवति ।।

---

1. यत्र ह. 2. कार्षापणः ड. 3. इति नास्ति इ. फ. 4. वाक्यमिदं नास्ति ब. ड. फ. 5. कर्म-प्रवचनीययुक्ते इति वर्तते इत्यधिकम् क. 6. युक्ते क. ग. इ. फ. ह. 7. द्वितीयापवादोऽयं योगः इत्यधिकम् ड. 8. उदाहरणमिदं नास्ति फ. ह. 9. इदम् इत्यधिकम् क. ड. फ, ग्रहणादिह पञ्चमी न भवति ह. 10. लक्षणादिषु इत्यधिकम् क. इ. फ. ग, लक्षणादौ इत्यधिकम् ड. 11. उदाहरणमिदं नास्ति ड. फ. ह. 12. प्रयच्छति फ. 13. कर्मप्रवचनीयसम्बन्धिसंबन्धात् ह. 14. नैष दोषः नास्ति ड. क. ड. इ. फ. 15. सम्बन्धि० क. ड. 16. परि नास्ति ब. ह. 17. अध्वनि वर्जिते ड. 18. विभक्ती इत्यधिकम् ड. ह. 19. व्रजति ग. 20. अध्वन्यत्यर्थ-ग्रहणम् क. ड. ह. 21–22. व्रजति ग. 23. चायं नास्ति इ. 24. आस्थितः नास्ति फ, संप्राप्तः नास्ति ह. 25. आक्रान्तः नास्ति क, संक्रान्तः ब. इ. ह. 26. तत्र नास्ति फ. 27. अध्वने क, पन्थानं गच्छति ड, अध्वनि गच्छति पथा गच्छति इ. 28. इति नास्ति ह.